अभिषिक्तः सुरगणैर्व्वरुणो भरतर्षभ ! ॥” तेजःसम्बन्धिनि, त्रि । यथा, रघुः । ११ । ४३ ।

“तैजसस्य धनुषः प्रवृत्तये
तोयदानिव सहस्रलोचनः ॥”)

तैजसः, पुं, (तेजसो विकारः । तेजस् + अण् ।) सूक्ष्मशरीरव्यष्ट्युपहितचैतन्यम् । यथा,— “एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति तेजोमयान्तःकरणोपहितत्वात् ॥” इति वेदान्तसारः ॥ (तैजसाहङ्कारविशेषः । यथा, भागवते । २ । ५ । २४ ।

“सोऽहङ्कार इति प्रोक्तो विकुर्व्वन् समभूत्त्रिधा ।
वैकारिकस्तैजसश्च तामसश्चेति यद्भिदा ॥”

घोटकविशेषः । तल्लक्षणादिकं यथा, भोजराजकृतयुक्तिकल्पतरौ ।

“ये क्रोधशीला भृशवेगयुक्ता
मुक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥”

सुमतिपुत्त्रः । यथा, ब्रह्माण्डे ३६ अध्याये ।

“तैजसस्तत्सुतश्चापि प्रजापतिरमित्रजित् ॥”)

तैजसावर्त्तनी, स्त्री, (आवर्त्ततेऽत्र । आ + वृत् + ल्युट् स्त्रियां ङीप् । तैजसानां धातुद्रव्याणां सुवर्णादीनां आवर्त्तनी ।) मूषा । इत्यमरः । २।१०।३३ ॥ तैजसगलानं मूची इति भाषा ॥

तैतिलं, क्ली, ववादिकादशकरणान्तर्गतचतुर्थकरणम् । तत्र जातफलं यथा,—

“कलासु दक्षो ललनाभिलाषी
सुमूर्त्तिसन्तर्जितकामदेवः ।
वक्ता गुणज्ञः कुशलः सुशील-
श्चेत्तैतिलाख्यं करणं प्रसूतौ ॥”

इति कोष्ठीप्रदीपः ॥

तैतिलः, पुं, गण्डकः । इति मेदिनी । ले, ६६ ॥

तैत्तिरं, क्ली, (तित्तिरीणां पक्षिणां समूहः । तित्तिरि + “अनुदात्तादेरञ् ।” ४ । २ । ४४ । इति अञ् ।) तित्तिरिगणः । इत्यमरः । २ । ६ । ४३ ॥ (यथा, गो: रामायणे ।२।१००।६३।

“वाप्यो मैरेयपूर्णाश्च मृष्टमांसचयैर्वृताः ।
प्रतप्तैः पैठरैश्चैव मार्गमायूरतैत्तिरैः ॥”)

तैत्तिरः, पुं, (तित्तिर एव । स्वार्थे अण् ।) तित्तिरिपक्षी । इति राजनिर्घण्टः ॥ (गर्भिणी एतन्मांसाशनाद्भयाढ्यं सुतं जनयेत् तद्यथा,

“नित्यभीतश्च तैत्तिरात् ॥”

इति सुश्रुते शारीरस्थाने तृतीयाध्याये ॥)

तैत्तिरीयकः, पुं, (तैत्तिरं तित्तिरिप्रोक्तयजुर्व्वेदीयशाखामधीते वेत्ति वा । छण् । ततः स्वार्थे कन् ।) तैत्तिरीयी । यजुर्व्वेदीयशाखाविशेषवेत्ता ॥ (उपनिषद्विशेषे, क्ली । तत्तु कृष्णयजुर्व्वेदान्तर्गतम् । इति मुक्तिकोपनिषत् ॥)

तैत्तिरीया, स्त्री, (तित्तिरिणा प्रोक्ता । छण् ।) यजुर्व्वेदस्य शाखाविशेषः । यथा,—

“देवरातसुतः सोऽपि छर्द्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् ॥
यजूंषि तित्तिरा भूत्वा तल्लोलुपतया ददुः ।
तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥”

इति श्रीभागवतम् ॥

तैरणी, स्त्री, (तीरे नमतीति । नम + डः । ततः स्वार्थे अण् । स्त्रियां गौरादित्वात् ङीष् ।) क्षुपविशेषः । तत्पर्य्यायः । तैरणः २ तैरः ३ कुनीली ४ रागदः ५ । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । व्रणनाशित्वम् । वरुणारङ्गदत्वञ्च । इति राजनिर्घण्टः ॥

तैलं, क्ली, (तैलं तैलवत् स्नेहोऽस्यस्येति । अच् ।) सिह्लकः । इति रत्नमाला ॥ (तिलस्य तत्सदृशस्य वा विकारः । तिल + “तस्य विकारः ।” ४ । ३ । १३४ । इत्यण् ।) तिलादिजातस्नेहः । यथा, भावप्रकाशे ।

“तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ॥”

तत्पर्य्यायः । म्रक्षणम् २ स्नेहः ३ अभ्यञ्जनम् ४ । इति हेमचन्द्रः । ३ । ८१ ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । त्वच्यत्वम् । उष्णत्वम् । व्यवायित्वम् । पित्तकारित्वम् । वद्धविण्मूत्रत्वम् । श्लेष्मावर्द्धकत्वम् । सर्व्ववातविकारनाशित्वम् । मेधाग्निबलवर्द्धनत्वञ्च ।

“नास्ति तैलात् परं किञ्चित् भेषजं मारुतापहम् ॥”

इति राजनिर्घण्टः ॥

पक्वपुरातनतैलस्य गुणः । महद्गुणत्वम् । किञ्चिद्गन्धहीनत्वञ्च । द्रव्यसंयोगे संस्कृततैलस्य सर्व्वरोगनाशित्वम् ॥ अवगाहने युक्ततैलस्य गुणः । शरीरबलकारित्वम् । शिरामुखरोमकूपधमनीनाड़ीद्वारा तृप्तिकारित्वञ्च । नित्यं मस्तके अधिकतैलदानगुणाः । शिरःशूलखालित्यपालित्यनाशित्वम् । केशमूलस्य दृढ़ताकारित्वम् । केशस्यापतनघनताकृष्णतादीर्घताकारित्वम् । इन्द्रियप्रसन्नताग्निशुद्धिकारित्वञ्च ॥ नित्यं कर्णे तैलपूरणस्य गुणाः । मन्याहनुसंग्रहोच्चैःश्रुतिवाधिर्य्यकर्णवातजरोगाजनकत्वम् ॥ मर्द्दने तैलस्य गुणः । घृतादष्टगुणगुरुत्वम् । इति राजवल्लभादिः ॥ * ॥

“प्रातःस्नाने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा ।
मद्यलेपसमं तैलं तस्मात्तैलं विवर्ज्जयेत् ॥”

इति कर्म्मलोचनम् ॥

“घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम् ।
अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः ॥”

इति तिथ्यादितत्त्वम् ॥ * ॥

वारविशेषे तैलग्रहणफलं यथा,—
रवौ हृद्रोगः सोमे कीर्त्तिलाभः कुजे मृत्युः बुधे पुत्त्राप्तिः गुरौ अर्थहानिः शुक्रे शोकः शनौ दीर्घायुः ॥ * ॥

अथ निषिद्धदिने तैलग्रहणदोषशान्त्यर्थदेयद्रव्यनियमः । रवौ पुष्पं गुरौ दूर्व्वा कुजे भूमिः शुक्रे गोमयम् । अस्य प्रमाणं यथा,—

“अर्के नूनं दहति हृदयं कीर्त्तिलाभश्च सोमे
भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्त्रलाभः ।
अर्थग्लानिर्भवति च गुरौ भार्गवे शोकयुक्त-
स्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः ॥”

इति ज्योतिःसारसंग्रहः ॥

वारादिविशेषे तदभ्यङ्गे गुणदोषौ यथा,—

“सन्तापः कीर्त्तिरल्पायुर्धनं निधनमेव च ।
आरोग्यं सर्व्वकामाप्तिरभ्यङ्गाद्भास्करादिषु ॥
उपोषितस्य व्रतिनः कृत्तकेशस्य नापितैः ।
तावत् श्रीस्तिष्ठति प्रीता यावत्तैलं न संस्पृशेत् ॥”

इति गारुड़े ११४ अध्यायः ॥ * ॥

अथ तैलवर्गः । तत्र तैलस्य स्वरूपनिरूपणम् ।

“तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम् ।
तत्तु वातहरं सर्व्वं विशेषात्तिलसम्भवम् ॥” * ॥

अथ तिलतैलगुणाः ।

“तिलतैलं गुरु स्थैर्य्यं बलवर्णकरं परम् ।
वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥
सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम् ।
वीर्य्येणोष्णं हिमं स्पर्शे वृंहणं रक्तपित्तकृत् ॥
लेखनं वद्धविण्मूत्रत्वगामाशयशोधनम् ।
दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत् ॥
श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम् ।
त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा ॥
छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते ।
भग्नस्फुटितविद्धाग्निदग्धाविश्लिष्टदारिते ॥
तथाभिहतनिर्भुग्नमृगव्याघ्रादिविक्षते ।
वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे ॥
सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते ॥” * ॥

ननु वृंहणलेखनयोः कथं सामानाधिकरण्यमित्याह ।

“हृद्यादिदुष्टपवनः स्रोतः सङ्कोचयेद्यदा ।
रसोऽसम्यग्वहन् कार्श्यं कुर्य्याद्रक्ताद्यवर्द्धनम् ॥
तेषु प्रवेष्टुं सरता सौक्ष्म्यस्निग्धत्वमार्द्दवैः ।
तैलं क्षमं रसं नेतुं कृशानां तेन वृंहणम् ॥
व्यवायसूक्ष्मतीक्ष्णोष्णसरत्वैर्म्मेदसः चयः ।
शनैः प्रकुरुते तैलं तेन लेखनमीरितम् ॥
द्रुतं पुरीषं बध्नाति स्खलितं तत् प्रवर्त्तयेत् ।
ग्राहकं सारकं वापि तेन तैलमुदीरितम् ॥
घृतमब्दात् परं पक्वं हीनवीर्य्यं प्रजायते ।
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥” *

अथ सर्षपराइतैलगुणाः ।

“दीपनं सार्षपं तैलं कटुपाकरसं लघु ।
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तासृदूषकम् ।
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम् ।
कण्डूकोठकृमिश्वित्रकुष्ठदुष्टव्रणप्रणुत् ॥
तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत् ।
राजिकयोः कृष्णराइ आरक्तराइ द्वयोः ॥ * ॥

अथ तोरीतैलगुणाः ।

तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित् ।
वह्निकृद्विषहृत् कण्डूकुष्ठकोठकृमिप्रणुत् ॥
मेदोदोषापहञ्चापि व्रणशोथहरं परम् ॥ * ॥

अथ तिसीतैलगुणाः ।

“अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत् ।
कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु ॥